# पुरोवाक्

स्वानुभूतेः आधारेण समग्रतया ऋग्वेदस्यानुशीलनं विधाय महर्षिः श्रीमदरविन्दः वेदवचनानां सारमेवं विवृणोति - एतदेव चरमं सत्यं वेदः प्रतिपादयति यत् अस्ति तत्र एकेमेव परमं चरमं च सत्यं यदस्माकं बाह्यसत्तायाः सत्यादुच्चतरम् । तद्वदस्ति एकं ज्योतिः यद् दृश्यमानज्योतेः उच्चतरं स्वतःप्रकाशमयं च। एवमेव अस्ति कोपि उच्चतरलोकः यस्य प्राप्तिः मानवजीवनस्य चरमं लक्ष्यं भवेत्। तत्प्राप्तये सत्यनिष्ठः प्रयासः करणीयः। साधारणचेतनायां मानवजीवनमिदं भूरिशः सङ्ग्राममयम्। सङ्ग्रमोयं पुनः धर्माधर्मयोः, सत्यासत्ययोः, पुण्यापुण्ययोः, देवासुरयोः च । अस्मिन् जीवनसङ्ग्रामे अन्तर्युद्धे विजयप्राप्त्यत्यर्थं सदैव देवानाम् आवाहनम् आवश्यकम् । ये तावत् दैवीगुणाः ते स्वात्मनि सम्पोषणीय्राः संवर्धनीयाः च। अन्ततः तदेकं यत् सत्यं तदेव जीवने प्रतिष्ठापनीयम्। जीवनस्य प्रत्येकविभावं तदेकेन सत्येन प्रकाशनीयम्। अयमेव सारः वैदिकयोगस्य। वेदे आहूताः देवाः अध्यात्मदृष्ट्या अस्माकं अन्तश्चेतनायां स्वस्वकार्याणि कुर्वन्तः सन्ति येन वयं जीवने अग्रे सरामः।

वेदमन्त्राणाम् अर्थव्याख्यानव्यापारे प्रायः केवलं बाह्यम् अर्थं स्वीक्रियते चेत् वेदस्य रहस्यार्थबोधनं दुष्करम्। अस्मिन् सन्दर्भे श्रीमद्भिः रङ्गनाथमहोदयैः विरचिता ध्वनिदीपिका इति वेदव्याख्या नितान्तम् उपयोगिनी । अत्र प्रायशः श्रीमदरविन्दपादानां व्याख्यानशैलीमवलम्ब्य, शास्त्रपरंपरामाश्रित्य पुनश्च स्वीयप्रतिभाबलेन, ध्यानबलेन, श्रीरामचरणयोरविरतभक्तिबलेन च ऐदम्प्राथम्येन सम्पूर्णस्य ऋग्वेदस्य व्याख्यानं सरलसंस्कृतेन विरचितम् इति नितरां हर्षस्य विषयः। श्रुतिगौरवाय स्वानुभूतये च आध्यात्मिकदृष्ट्या बालव्याख्यनमिदं विरचितमिति स्वयं भाष्यकारेण रङ्गनाथवर्येण यदुक्तं स्वीयप्रस्तावनायां तदस्य भाष्यग्रन्थस्य वैशिष्ट्यं प्रतिपादयति । भाष्यमिदम् अवश्यं ऋग्वेदमन्त्राणाम् अवगमने महत्सहायभूतं भविष्यति इति निःसङ्कोचं वक्तुं शक्यते।

तस्मै वेदात्मने नमः

-सम्पदानन्दमिश्रः

श्री अरविन्दभारतीयसंस्कृतिसंस्थानस्य निर्देशकः, पुदुच्चेरी